National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 142-145
© 2025 NJHSR
www.sanskritarticle.com

**गोर्ति श्री नागलक्ष्मीः**
अनुसन्धात्री, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**गोर्ति श्री नागलक्ष्मीः**
अनुसन्धात्री, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्रीनरसिंहविजयचम्पूकाव्ये अर्थालङ्कारविचारः

**गोर्ति श्री नागलक्ष्मीः**

**प्रस्तावना**

अलङ्कारः काव्यप्रयोजनेषु अन्यतमः भवति। लाक्षणिकाः अलङ्कारः इत्युक्ते उक्तिवैचित्र्यम्, सौन्दर्यमलङ्कारः इत्यादीनि लक्षयन्ति। काव्यशोभाकाराः अलङ्काराः भवन्ति। यैः विना काव्यं न शोभते ते एव अलङ्काराः इत्युच्यन्ते। भामहः वदति यत् **न कान्तमपि निर्भूषं विभाति वनिताननमिति।**[1] इति। काव्यवनिताम् अलङ्कर्तुम् अलङ्कराणाम् आवश्यकता भवति। काव्यस्य शब्दः अर्थश्च शरीरभूतः धर्मः भवतः।

**अलङ्कारशब्दस्य व्युत्पत्तिः :-**

साहित्यशास्त्रे अलङ्कारशब्दस्यार्थः भूषणरुपार्थे तथा सौन्दर्यरूपार्थे वा व्यवह्रियते। अलमिति उपपदात् कृ धातोः घञि प्रत्यययोगेन अलङ्कारशब्दः निष्पद्यते।

**वेदेषु अलङ्काराणां प्रयोगः :-**

उपमादीनामलङ्कराणाम् उदाहरणानि प्राचीनग्रन्थेषु अपि द्रष्टुं शक्यते। यथा ऋग्वेदे उपमायाः उदाहरणम्-

**अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये घनानाम्।**
**जायेवपत्य उशती सुवासा उषा हस्रेव निरिणूते अप्सः॥**[2]

व्यासकृतवेदान्ते उपमारूपकादीनाम् उल्लेखः भवति यथा- **अत एव चोपमा सूर्यकादिवत्। उस्त्रा इव सूर्यो ज्योतिषामहो विश्वेषामिज्जनिता ब्रह्मणामसि।**[3]

हे बृहस्पति सूर्यः यथा तेजश्शाली भूत्वा किरणान् प्रसारयति तद्वत् भवान् अपि मन्त्रान् सर्वानपि सृजति इत्यत्र सादृश्यत्वात् उपमा भवति।

**अग्निपुराणे अलङ्करालक्षणम्**

अलङ्कारशास्त्रस्येतिहासे अग्निपुराणकारस्य व्यासस्य अलङ्कारचर्चा एव सर्वप्रथमा इति साहित्यिकाः अभिप्रयन्ति। अत्र व्यासः काव्यलक्षणनिरूपणावसरे अलङ्काराणां विशेषतां प्रतिपादितवान्। रसानां समुत्कर्षकाः अलङ्काराः भवन्ति। रसस्य साक्षादेव व्यञ्जकाः गुणाः किन्तु काव्यशोभावर्धकाः भवन्ति अलङ्काराः इति। अत एव व्यासेनोक्तं यत्-

**काव्यं स्फुरदलङ्कारं गुणदोषवर्जितम्।**
**अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्॥**[4]

**विविधाचार्यमतानुसारम् अलङ्कारस्य लक्षणम्**

❖ **अलङ्काराणामुल्लेखः नाट्यशास्त्रेऽपि** दृश्यते। यथा –

**उपमा रूपकं चैव दीपकं यमकं तथा।**
**अलङ्कारास्तु विज्ञेया चत्वारो नाटकाश्रयाः॥**[5]

अर्थात् उपमा, रूपकं, दीपकं, यमकादि चत्वारोऽलङ्काराः निर्दिष्टमस्ति।

❖ **काव्यादर्शे आचार्यो दण्डी** अलङ्कारस्य स्वरूपं लक्षयति। यथा हारादयाः लावण्यमनोहररूपशरीरस्य शोभां वर्धयन्ति, तथैव काव्यस्य इष्टार्थव्यवच्छिन्नपदावलीरूपस्य अनुप्रासादि अलङ्काराः शोभां वर्धयन्ति। यथा-

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते॥**[6]

❖ **वामनः काव्यालङ्कारसूत्रवृत्तौ** सर्वमपि काव्यशास्त्रगतं सौन्दर्यम् अलङ्कारशब्देन परिगृह्णाति। यथा- **सौन्दर्यमलङ्कारः**।[7] काव्ये दोषाणां परित्यागात् गुणालङ्काराणां च अपादानेन सौन्दर्य-रूपोऽलङ्कारः जायते।

**काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।**[8]

गुणालङ्कारसंस्कृतयोः शब्दर्थयोः समाहारः एव काव्यमिति अस्य मतम्।

**काव्यशोभायाः कर्तारौ धर्मा गुणाः।**
**तदतिशयहेतवस्त्वलङ्काराः॥**[9]

अर्थात् काव्यस्य शोभाजनकाः गुणाः, तदतिशयसम्पादनसाधनाः तु अलङ्काराः भवन्ति। एवमलङ्काराणां महत्त्वं जायते।

❖ ध्वनिवादी आचार्यः आनन्दवर्धनस्य मतानुसारम् अलङ्कारः काव्यस्य अस्थिरधर्मः भवति, सः रसस्य धर्मः न भूत्वा शब्दार्थयोः धर्मः भवति इति। यथा-

**वाच्यवाचकलक्षणान्यडानि ये पुनः अवलम्बन्ते।**
**तदाश्रितास्तेङ्लङ्काराः मन्तव्याः कटकादिवत्॥**[10]

❖ वक्रोक्तिकारः कुन्तकः अलङ्कारविषये उक्तं यत् अलङ्कार्यस्य प्रसाधकाः भवन्ति चेदेव अलङ्कारः इति उच्यते, एवं तदा एव काव्यं भवति।

**अलङ्कृतिरलङ्कार्यमपोधृत्य विवेच्यते।**
**तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥**[11]

❖ **काव्यप्रकाशे मम्मटः** वदति यत् मानवशरीरे यथा हारादि अलङ्काराः शोभां वर्धयन्ति तथैव काव्यस्य अनुप्रासोपमा-दयालङ्काराः शोभां वर्धयन्ति।

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥**[12]

❖ **विश्वनाथकविराजः** अलङ्कारं लक्षयति यथा अङ्गादयः देहिनां देहमलङ्कुर्वन्ति तथैव अनुप्रासोपमादयः रसादीन् उत्कर्षयन्तः शब्दार्थयोः सौन्दर्योत्पादनेन काव्यम् अलङ्कुर्वन्ति इति।

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥**[13]

❖ **चन्द्रालोके जयदेवः** अलङ्करानाह। कवेः प्रौढिवशेन वा शब्दार्थयोः मनोहरं सन्निवेशम् अलङ्कारः भवति इति। यथा-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलंकृती॥**[14]

❖ **भामहेनोक्तम् अलङ्कारलक्षणम्**

अलङ्काराणां स्थितिः शब्दार्थोत्कर्षकत्वेन इति अस्य मतम्। यथा-

**गिरमलंङ्काररविधिः सविस्तरः स्वयं विनिश्चित्यधिया मयोदितः।**
**अनेन वागर्थविदामलङ्कृता, विभाति नारीव विदग्धमण्डना॥**[15]

**अलङ्काराणां वर्गीकरणम् –**

आचार्याः अलङ्काराणां वर्गीकरणे समस्तालङ्काराः विभागत्रयेण कृतं वर्तते।

1.शब्दालङ्कारः
2.अर्थालङ्कारः
3.उभयालङ्कारः

**श्रीनरसिंहविजचम्पूकाव्ये अर्थालङ्काराणां प्रयोगः**

**उपमा :-**

**लक्षणम् - साम्यं वाच्यमवैर्म्यं वाक्यैक्य उपमा द्वयोः॥**[16]

यत्र उपमानं तथा उपमानयोः कस्यापि सादृश्यः अथवा साम्यम् एकस्मिन् वाक्ये प्रतिपादितः भवति चेत् तत्र उपमा इति। अर्थात् एकस्मिन् वाक्ये उपमानोपमेय इति द्वयोः पदार्थयोः वैधर्म्यरहित वाच्यसादृशम् उपमा इति कथ्यते। अत्र साम्यम्, इव, यथा, तुल्यादि शब्दैः वाच्यः भवति।

उदाहरणम् -

**अनेकशास्त्रार्थविचारहीना दिष्ट्या हि जाता कृतये मनीषा।**
**यथा सुवर्णे नवरत्नहीनं भूषायमाणं भवति त्रिलोक्याम्॥**[17]

**समन्वयः** :– अत्र कविः स्वविनम्रतां प्रकटीकरोति यत् अनेकशास्त्रा-णाम् अर्थज्ञानात् रहितः मम या बुद्धिः अस्मिन् काव्यलेखनकार्ये ईश्वरस्य कृपया प्रवृत्तो जातः। यथा विविधमणिभ्यः अप्रवृत्ता अपि सुवर्णः संसारे आभूषणमिति मन्यन्ते। अस्मिन् श्लोके कविः बुद्धेः समानता सुवर्णेन सह कृतमस्ति। अतः अत्र उपमालङ्कारः भवति।

**उत्प्रेक्षा :-**

लक्षणम्- **भवेत् संभावनोत्प्रेक्षा प्रकृतस्य परात्मना।**
**वाच्या प्रतीयमाना सा, प्रथमं द्विविधा मता॥**[18]

अर्थात् प्रकृतः उपमेयस्योपरि उपमानस्य सम्भावना भवति तर्हि सा उत्प्रेक्षा इति कथ्यते। तात्पर्यमिदमस्ति यत् उपमेये उपमानस्य सम्भावनायाः उत्प्रेक्षा इति नाम।

**तेनैव खड्गेन कृतप्रचारं**
**दैत्यं विहन्तुं समरप्रियोऽभूत्।**
**उद्वीक्ष्य कालं विधिवाक्यजुष्टं**
**त्यक्त्या सभायां विमृशन्निवासौ॥**[19]

**समन्वयः :-** प्रादुर्भूतं भगवन्तं कृताञ्जलिं कुर्वन्तं स्वपुत्रं हन्तुं प्रतिधावन्तं तं हिरण्यं नरसिंहः भूप्रदेशे पातयामास। नरसिंहः तेन खड्गेनैव कृतप्रचारेण तम् असुरं हिरण्यं हन्तुं ब्रह्मणः वरप्रदानवचनेन युक्तकालम् उद्वीक्ष्य विमृशन् इव वाग्वैयर्थ्यं कथं न स्यादिति चिन्तयन्निव सभायाम् समरप्रियः अभूत्। प्रस्तुत पद्ये विमृशन्निवासौ इत्यत्र क्रियोत्प्रेक्षायाः सुन्दरचमत्कारः दृश्यते ।

**रूपकम् :-**

लक्षणम् – **रूपकं रूपितोपाद्विषये निरपह्नवे॥**[20]

निषेधरहित उपमेये यत्र उपमानस्य आरोपः जायते तत्र रूपकालङ्कारः भवति।

उदाहरणम् – **मही यस्य पादौ वियन्नाभिदेशः**

**दिवारात्रिनाथौ कृपापूर्णनेत्रे।**
**जगत्प्राण एवासुराशाः श्रुती स्वः**
**शिरस्तं नमन्तो वयञ्चेव धन्याः॥**[21]

**समन्वयः** :- प्रस्तुत श्लोके पृथ्वी विष्णोः पादः, आकाशः नाभिः, दिनं नेत्रमित्यादिरूपेण दत्तमस्ति। अर्थात् पृथिव्याः उपरि पादः, आकशस्योपरि नाभिः, सूर्यचन्द्रयोः उपरि नेत्रस्य आरोपः कृतः। अतः अत्र रूपकालङ्कारः भवति।

**परिकरालङ्कारः :-**

लक्षणम् – **उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः।**[22]

यत्र विशेषणं कस्यापि विशेषाभिप्रायेण दत्तं भवति तत्र विशेषणानां साभिप्रायतायाः कारणात् परिकरालङ्कारः भवति।

**मधुहर मुरहर शौरे, दामोदर वीर वरद दैत्यारे।**
**अरिधर माधर विष्णो, दरधर पीताम्बरेश पाहिमान्॥**[23]

**समन्वयः** :-अत्र भगवतः रक्षां कर्तुं प्रार्थना कृतमस्ति। यः रक्षां कर्तुं समर्थः तमेव प्रार्थना कृतमस्ति। भगवान् रक्षायां कथं समर्थः इत्याङ्काक्षायां प्रश्ने सति जितेन्द्रियमनः प्रत्यक्षभूतः शूरः, पीताम्बरः, सर्वनियन्तः त्वद्भक्तियुक्तजनान् रक्ष। सः प्रह्लादः हरिकीर्तनयुक्तगानेन हरिरेव सर्वातिशयितः, भक्त्यादिभिः जागरुकाः तान् भक्तान् प्रीणयन्, उच्चैः हरिगानं करोति। अत्र श्लोके प्रयुक्त विशेषानां द्वारा ज्ञातुं शक्यते। अत्र सर्वाणि विशेषणानि भगवतः रक्षा साधनद्योतक्स्य प्रभावेन कृतं वर्तते। अतः अत्र परिकरालङ्कारः भवति।

**काव्यलिङ्गालङ्कारः :-**

लक्षणम्- **हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।**[24]

वाक्यार्थः अथवा पदार्थो वा यत्र हेतुर्भवति तत्र काव्यलिङ्गालङ्कारः भवति। अर्थात् कस्यापि कथित अर्थस्य उपयुक्ततायाः सिद्ध्यर्थं काऽपि हेतुः अर्थात् कारणम् उपरिक्तं भवति तत्र काव्यलिङ्गालङ्कारः भवति। अत्र हेतुः वाक्यार्थरूपेण अथवा पदार्थरूपेण वा भवितुमर्हति।

उदाहरणम् – **वन्देऽहं श्रीपतिं विष्णुं भक्तानामिष्टदायकम्।**
**वैकुण्ठवासनिरतं मन्मनोभीष्टसिद्धये॥**[25]

**समन्वयः** :-उपर्युक्त श्लोके इष्टदायकः भगवतः विष्णोः स्तुतिः कृतमस्ति। अत्र भक्तानां मनोरथं पूरयति इति कारणम् उक्तं वर्तते। प्रथमवाक्ये स्तुतेः अनन्तरं द्वितीयवाक्ये स्तुतियोग्यत्वस्य हेतुः उपस्थापितः। अतः अत्र वाक्यार्थहेतुत्वात् काव्यलिङ्गालङ्कारः भवति।

**सहोक्तिः :-**

लक्षणम्- **सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः।**
**सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत्॥**[26]

यस्मिन् वाक्ये अतिशयोक्तिः मूलभूता भवति तदा सहपर्यायशब्दस्य सामर्थ्यात् वस्तुद्वयोः वाचकं भवति सा सहोक्तिः।

**तदा कयाधुः प्रसमीक्ष्य देवं**
**श्रिया सनाथंरमणीयदेहम्।**
**स्तुतिश्चकाराथ सुखप्रपत्यै**
**नमश्च भक्तेन सुतेन साकम्॥**[27]

**समन्वयः** :- हिरण्यस्य वधानन्तरं कयाधुवृत्तिं दर्शयति कविः। दुष्टनिर्गमनकाले कयाधुः श्रियासहितं रमणीयदेहं लक्ष्मीनरसिंहं प्रदक्षिणक्रमेण सम्यक् दर्शनं कृत्वा भक्तेन स्वसुतः प्रह्लादेन साकं स्तुतिं कृत्वा अनन्तरं मोक्षलाभाय नमस्कारञ्च अकरोत्। उपर्युक्त श्लोके सुतेन साकम् इत्यत्र सहार्थस्य वाचक साकं शब्दस्य प्रयोगः जातः इत्यतः सहोक्तिरलङ्कारस्य उदाहरणमिदम्।

**विरोधाभासालङ्कारः :-**

लक्षणम्- **जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।**
**क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः।**
**विरुद्धमेव भासते विरोधोऽसौ दशाकृतिः॥**[28]

अर्थात् यत्र पदार्थद्वये जाति, गुणक्रियादीनाम् आधारेण वास्तविकविरोधः मा भूत्वा विरोधस्य आभासः भवति तर्हि तं विरोधाभासालङ्कारमिति उच्यते।

**अनङ्गीकृतैकक्रतुरपि अङ्गीकृतशतक्रतुः, कृष्णवर्त्मशिक्षकोपि कृष्णवर्त्मरक्षकः, पुरस्कृतकविरपि तिरस्कृतकविः** ...।[29]

**समन्वयः :- अनङ्गीकृतैकक्रतुरपि अङ्गीकृतशतक्रतुः** - अर्थात् एकः अपि यज्ञः न कृतः तथापि शतक्रतुः कथं जातः इति विरोधः। आत्मीयरूपेण इन्द्रं स्वाधीनं कृतवान् अर्थात् स्वयम् एकः यागः न कृत्वाऽपि यः शतं यज्ञं कृतः तम् इन्द्रं स्व अधीनं कृतवान्। अत्र विरोधस्य परिहारः जातः इत्यतः अत्र विरोधाभासालङ्कारः भवति।

**कृष्णवर्त्मशिक्षकोऽपि कृष्णवर्त्मरक्षकः** - कृष्णवत् अर्थात् वैदिकमार्गस्य विष्णुभक्तः न भूत्वा अपि विष्णुभक्तेः मार्गस्य रक्षकः इति अत्र विरोधः। अतः कृष्णवत् अर्थात् अग्नेः रक्षकत्वे सति विरोधस्य परिहारः जायते। अतः अत्र विरोधाभासालङ्कारः भवति।

**पुरस्कृतकविरपि तिरस्कृतकविः –** अत्र यः कविः शुक्रः पूजितः स एव कश्चन तिरस्कृतः अपमानितः इति विरोधः। तिरस्कृताः (धिक्कृताः) कवयः विद्वांसः येन, स एव विद्वान् कः इति सर्वान् न्यक्करोति। अर्थात् यः विद्वांसः अन्यान् तिरस्करोति, स एव केनचित् अन्येन तिरस्कृतः भवति इति आभासः।

**व्यतिरेकालङ्कारः :-**

लक्षणम् – **आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा।**
**व्यतिरेकः.................॥**[30]

यत्र उपमानात् उपमेयस्य आधिक्यं वा न्यूनतायाः वर्णनं वा भवति चेत् तत्र व्यतिरेकालङ्कारः भवति।

सदस्योपदेशसमये निर्भयं प्रह्लादकृतोपदेशश्रवणानन्तरं हिरण्यः आक्रोशात् प्रश्नप्रकारमाह-

उदाहरणम् – **रे रे बालिश गर्जसि त्वमधुना को वा हरिः शर्मदः**
**कुत्रास्ते मयि शासति त्रिभुवनं त्रैलोक्यनाथः परः।**
**मेशं दुर्जनशिक्षकं मदपरं मन्येत को वा जनः**
**तं नो दर्शय मारतातमहितं रक्ष स्वागात्रं शुभम्॥**[31]

**समन्वयः** :- अरे दुर्बुद्धे, त्वम् उच्चैः गर्जसि, मयि प्रत्यक्षतः त्रिभुवनं शासति सति अन्यः त्रिलोकरक्षकः सुखदाता त्वदूर्जित हरिः कीदृग्रूपः ? कस्मिन् स्थले वर्तते ? सर्वेऽपि मामेव सर्वजगदीश्वरमिति निश्चिनुते अतः को वा जनः त्वदितरः, मत् अपरं दुर्जनशिक्षकं श्रियः पतिं चिन्तयेत्। न कोऽपि मन्यते, मन्मथस्य जनकं शत्रुं तं हरिम् अस्माकं कृते दर्शय, शुभं त्वच्छरीरं रक्ष नो चेत् भवन्तं हनिष्यामि इति अपृच्छत्। प्रस्तुत श्लोके हिरण्यकशिपुद्वारा विष्णोः हीनत्वकारणात् व्यतिरेकालङ्कारः भवति।

**उल्लेखालङ्कारः** :-

लक्षणम् – **क्वचिद् भेदात् ग्रहीतृणां विषयाणां तथा क्वचित्।**

**एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते॥**[32]

क्वचित् ग्रहीतृणां भेदात्, क्वचित् विषयाणां भेदात् वा यत्र एकस्य पदार्थस्य अनेक प्रकारेण उल्लेखः क्रियते तर्हि तत्र उल्लेखः इति अभिधीयते। अर्थात् यत्र ग्रहीता अथवा विषयोः भेदेन एकः वस्तुनः अनेकप्रकारेण उल्लेखः क्रियते चेत् तत्र उल्लेखालङ्कारः भवति।

पर्वतनिपातानन्तरं प्रह्लदः वयस्यानां हितोपदेशमाह-

**अभयद जितमधुमुरसुरवदं**
**शमधननिजजनसुखतरवतनम्।**
**जलचरहृतपदकरिवरसुखदं**
**हृदि भज जनिमृतिहरमतिशमनम्॥**[33]

**समन्वयः** :- प्रह्लादः वदति यत् यः अपुनर्भवमोक्षं ददातीति अभयदः सः, यः मधुमुरप्रसिद्धतन्नामकासुरौ जितः सः, सुखवरदः, जगदतीतनित्यानन्दस्वरूपी, यः स्वभक्तानां विषये क्षेमाधिक्यपरम् इति परोक्षवाक्यं वदति सः, तं सर्वान्तर्यामिणं, जनिमृतिहरं, भक्तपराधसहिष्णुं तं, किञ्च अयोग्यानामस्माकं कथं तत्फलप्राप्तिः इति चेत् तत्राह जलचरेण यथा तथा गृहीतं पदं यस्य तं, सुखदं जातिकुलाद्यनपेक्षवन्तं हरिं हृदि सेवस्व।

अत्र भिन्नभिन्नकार्याणां कर्ता कारणात् भक्तिद्वारा भगवतः अनेकरूपेषु दृश्यते इति कृत्वा अनेकधा उल्लेखः भवति।

**उपसंहारः**

एवं निष्कर्षरूपेण वक्तुं शक्यते यत् यथा लोके कटककुण्डलादयः अलङ्काराः शरीरस्य शोभां वर्धयन्ति तथा उपमादि अलङ्काराः काव्यस्य शोभां वर्धयन्ति। अस्मिन् काव्ये रसानां समुत्कर्षकाः अलङ्काराः भवन्ति। एवं रसस्य साक्षादेव व्यञ्जकाः गुणाः, काव्यशोभवर्धकाः अलङ्काराः इति अत्र स्पष्टं भवति।

**उपयुक्तग्रन्थसूची**


1. काव्यालङ्कारः – भामहः, आनन्दः, चौकाम्बा संस्कृत सीरीज आफीस्, वारणासी, 2002
2. अग्निपुराणम् - वेदव्यासः, गीताप्रेस्, गोरखपुर, 2012
3. नाट्यशास्त्रम् - भरतमुनिः, व्याख्याकारः श्री बाबूलाल शुक्ल, चौखाम्भा संस्कृत संस्थान, वारणासी, 2022
4. काव्यालङ्कारसूत्रवृत्तिः - वामनः, हरिगोविन्दशास्त्री, चौखाम्बा सुरभारती प्रकाशन्, 2016
5. काव्यप्रकाशः – मम्मटाचार्यः, रघुनाथप्रसादचतुर्वेदी, चौखाम्बा संस्कृत संस्थान्, वारणासी, 2013
6. साहित्यदर्पणः – विश्वनाथः, व्याख्याकारः आचार्य शेषराजशर्मा रेग्मी, चौखाम्बा कृष्णदास अकादमी, वारणासी, 2022
7. चन्द्रालोकः - जयदेवः, डा. श्रीकृष्णमणि त्रिपाठी, चौखाम्बा सुरभारती प्रकाशन्, वारणासी, 2012
8. श्रीनरसिंहविजयचम्पूः - श्रीनरसिंहशास्त्रिः, श्रीवाणीविलास प्रेस्, श्रीरङ्गम्, 1969


**सन्दर्भाः**

[1] का.अ.1/13
[2] ऋ.वे.1/124/7
[3] ऋ.वे.2/23/2
[4] अ.पु.1/164
[5] ना.शा.16/41
[6] का.अ.2/1
[7] का.सू.वृ.1/1/3
[8] का.सू.वृ.1/1/1
[9] का.सू.वृ.3/1/2
[10] ध्व.लो.लो.2/6
[11] व.जी
[12] का.प्र.8/67
[13] सा.द.10/1
[14] च.लो.1/8
[15] का.अ.58/3
[16] सा.द.10/4
[17] श्री.न.वि.च.पू.का.5
[18] सा.द.10/40
[19] श्री.न.वि.च.उ.का.105
[20] सा.द.10/28
[21] श्री.न.वि.च.पू.का.29
[22] सा.द.10/57
[23] श्री.न.वि.च.उ.का.91
[24] सा.द.10/61
[25] श्री.न.वि.च.पू.का.1
[26] सा.द.10/54
[27] श्री.न.वि.च.उ.का.108
[28] सा.द.10/67
[29] श्री.न.वि.च.पू.का.71
[30] सा.द.10/51
[31] श्री.न.वि.च.उ.का.उ.का.99
[32] सा.द.10/37
[33] श्री.न.वि.च.उ.का.81